और्व्व उवाच ।
ततस्तयोर्नाम चक्रे नारदो वचनानृप ।
ज्येष्ठो भैरवनामाभूत् वीरः पुत्रो भयङ्करः ।
वेतालसदृशः श्यामो वेतालोऽभूत्तथापरः ।
इति चक्रे तयोर्नाम देवर्षिर्न्नृप्य सुतः ॥"
इति कालिकापुराणे ४९ अध्यायः ॥

वेतालभट्टः, पुं, राजविक्रमादित्यस्य नवरत्नान्तर्गतरत्नविशेषः । यथा,—
"धन्वन्तरिः क्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥"
इति नवरत्नश्लोकः ॥

वेत्ता, [ऋ]-त्रि, ज्ञाता । वेत्तीति विदधातोस्तृच्प्रत्ययेन निष्पन्नमिदम् ॥ (यथा, हितोपदेशे ।
"यथा खरश्चन्दनभारवाही
भारस्य वेत्ता नतु चन्दनस्य ॥")

वेत्रः, पुं, (वी+"गुधृवीपचीति ।" उणा॰ ४ । १६६ । इति त्रः ।) स्वनामख्यातवृक्षः । तत्पर्य्यायः । वेतः २ योगिदण्डः ३ सुदण्डः ४ मृदुपर्व्वकः ५ ॥ (यथा, शाकुन्तले । ५ ।
"आचार इत्यधिकृतेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः ॥")
स तु पञ्चविधः । तेषां गुणाः । शीतलत्वम् । कषायत्वम् । भूतपित्तहरत्वञ्च । इति राजनिर्घण्टः ॥ तस्याग्रं वेताग् इति ख्यातम् । तद्गुणाः । दीपनत्वम् । रुच्यत्वम् । तिक्तत्वम् । पित्तकफनाशित्वञ्च । तत्फलगुणाः । वातपित्तनाशित्वम् । अम्लत्वञ्च । इति राजवल्लभः ॥ असुरविशेषः । तस्य प्रमाणं वेत्रासुरशब्दे द्रष्टव्यम् ॥

वेत्रकीयः, त्रि, (वेत्र+"नड़ादीनां कुक् च ।" ४ । २।९१ । इति कुक् छश्च ।) वेत्रसमूहयुक्तदेशादिः । इति सिद्धान्तकौमुदी । (एकचक्रा नगरी तु वेत्रप्राचुर्य्यवत्त्वेन तदाख्ययापि प्रसिद्धा । यथा, महाभारते । १ । १६१ । ६ ।
"वेत्रकीयगृहे राजा नायं नयमिहास्थितः ।
उपायं तं न कुरुते यत्नादपि स मन्दधीः ॥")

वेत्रधरः, पुं, (वेत्रस्य धरः ।) द्वारपालः । इति हलायुधः ॥ यष्टिधारके, त्रि ॥

वेत्रधारकः, पुं, (वेत्रस्य धारकः ।) द्वारपालः । इति जटाधरः ॥

वेत्रवती, स्त्री, नदीविशेषः । इत्यमरः ॥ सा तु मालवदेशात् कालपीनामनगरे यमुनायां मिलिता । वेत्रासुरमाता । यथा, वराहपुराणे ।
"वेत्रवत्युदरे जातो नाम्ना वेत्रासुरोऽभवत् ॥"

वेत्रहा, [न्] पुं, (वेत्रं हतवान् । हन+क्विप् ।) इन्द्रः । इत्यमरः ॥

वेत्रावती, स्त्री, वेत्रवती नदी । यथा,—
"तत्राम्या इयते जलं सुमधुरं कान्तिप्रदं पुष्टिदं
हृद्यं दीपनपाचनं बलकरं वेत्रावती तापिनी ।"
इति राजनिर्घण्टः ।

वेत्रासनं, क्ली, (वेत्रस्यासनम् ।) वेत्रनिर्म्मितासनम् । तत्पर्य्यायः । आसन्दी २ । इति हेमचन्द्रः ॥

वेत्रासुरः, पुं, (वेत्रनामकोऽसुरः ।) स्वनामख्यातासुरः । तस्योत्पत्तिर्यथा,—
महातपा उवाच ।
"आसीद्राजा पुरा राजन् सिन्धुद्वीपः प्रतापवान् ।
वारुणांशो महाराजोऽसौऽरण्ये तपसि स्थितः ॥
पुत्रो मे शत्रुनाशाय भवेदिति नराधिपः ।
एवं कृतमतिः सोऽथ महता तपसा स्वकम् ।
कलेवरं स्थिरो भूत्वा शोषयामास सुव्रतः ॥
प्रजापाल उवाच ।
कथं तस्य द्विजश्रेष्ठ शक्रेणापकृतं भवेत् ।
येनासौ तद्विनाशाय पुत्रमिच्छन् व्रते स्थितः ॥
महातपा उवाच ।
सोऽन्यजन्मनि पुत्रोऽभूत् त्वष्टुर्बलवतां वरः ।
अवध्यः सर्व्वशस्त्रौघैरपां फेनेन नाशितः ॥
जलफेनेन निहितस्त्रिशिरः क्षयमवाप्नुयात् ।
पुनर्वंशान्वयो जातः सिन्धुद्वीपेतिसंज्ञितः ॥
स तेपे परमं तीव्रं शक्रवैरमनुस्मरन् ।
ततः कालेन महता नदी वेत्रवती शुभा ॥
मानुषं रूपमास्थाय सालङ्कारा मनोरमम् ।
आजगाम यतो राजा तेपे परमकं तपः ॥
तां दृष्ट्वा रूपसम्पन्नां स राजा क्षुब्धमानसः ।
उवाच कासि सुश्रोणि सत्यं कथय भामिनि ॥
नद्युवाच ।
अहं जलपतेः पत्नी वरुणस्य महात्मनः ।
नाम्ना वेत्रवती पुण्या त्वामिच्छन्तीह आगता ॥
साभिलाषां परस्त्रीं यो भजमानां विसर्ज्जयेत् ।
स पापपुरुषो ज्ञेयो ब्रह्महत्याञ्च विन्दति ॥
एवं ज्ञात्वा महाराज भजमानां भजस्व माम् ।
एवमुक्तस्तया राजा साभिलाषोपभुक्तवान् ॥
तस्य सद्योऽभवत् पुत्रो द्वादशार्कसमप्रभः ।
वेत्रवत्युदरे जातो नाम्ना वेत्रासुरोऽभवत् ॥
बलवानतितेजस्वी प्राग्ज्योतिषः पतिर्भवेत् ।
स कालेन युवा जातो बलवान् दृढ़विक्रमः ॥
महायोगेन संयुक्तो जिगाय च वसुन्धराम् ।
सप्तद्वीपवतीं पश्चान्मेरुपर्व्वतमारुहत् ।
तत्रेन्द्रं प्रथमं जिग्ये पश्चादग्निं यमं ततः ॥"
इति वराहपुराणे देवोत्पत्तिनामाध्यायः ॥

वेत्री, [न्] पुं, (वेत्रोऽस्यास्तीति । वेत्र+इनिः ।) द्वारपालकः । इति हेमचन्द्रः ॥ वेत्रयुक्ते, त्रि ॥

वेथ, ऋ ङ याचे । इति कविकल्पद्रुमः ॥ (भ्वा॰-आत्म॰-द्विक॰-सेट् ।) ङ, वेथते । इति दुर्गादासः ॥

वेदः, पुं, (विद+घञ् ।) विष्णुः । यथा,—
"वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ॥"
इति विष्णुसहस्रनामस्तोत्रम् ॥
वृत्तम् । इति मेदिनी ॥ क्वचित् पुस्तके वित्तमित्यपि पाठः । यज्ञाङ्गम् । इति नानार्थरत्नमाला ॥ मीनशरीरावच्छेदेन भगवद्वाक्यम् । इति न्यायशास्त्रम् ॥ धर्म्मब्रह्मप्रतिपादकमपौरुषेयवाक्यम् । इति वेदान्तशास्त्रम् ॥ ब्रह्ममुखनिर्गतधर्म्मज्ञापकशास्त्रम् । इति पुराणम् ॥ तत्पर्य्यायः । श्रुतिः २ आम्नायः ३ । इत्यमरः ॥ छन्दः ४ ब्रह्म ५ निगमः ६ । इति शब्दरत्नावली ॥ प्रवचनम् ७ । इति जटाधरः ॥*॥ वेदस्य प्रादुर्भावो । यथा । कदाचित् कथं स्रक्ष्यामीति ध्यायतो ब्रह्मणो मुखचतुष्टयेभ्यश्चत्वारो वेदाः प्रादुरासन् । यथा । एकविंशतिशाखात्मक-ऋक् १ शतशाखात्मकयजुः २ सहस्रशाखामयसाम ३ नवशाखामयाथर्व्व ४ । इति पुराणम् ॥ अपि च ।
श्रीमार्कण्डेय उवाच ।
"तस्मादण्डाद्विनिर्भिन्नाद्ब्रह्मणोऽव्यक्तजन्मनः ।
ऋचो बभूवुः प्रथमं प्रथमाद्वदनान्मुने ॥
जवापुष्पनिभाः सद्यस्तेजोरूपा ह्यसंहताः ।
पृथक् पृथग्विभिन्नाश्च रजोरूपा महात्मनः ॥
यजूंषि दक्षिणाद्वक्त्रादनिबद्धानि कानिचित् ।
यादृक्वर्णं तथा वर्णान्यसंहतिपराणि वै ॥
पश्चिमं यद्विभोर्व्वक्त्रं ब्रह्मणः परमेष्ठिनः ।
आविर्भूतानि सामानि ततः छन्दांस्यथा ॥
अथर्व्वाणमशेषेण भृङ्गाञ्जनचयप्रभम् ।
घोराघोरस्वरूपं तदाभिचारिकशान्तिमत् ॥
उत्तरात् प्रकटीभूतं वदनात्तत्तु वेधसः ।
सुखं सत्त्वतमःप्रायं सौम्यासौम्यस्वरूपवत् ॥
ऋचो रजोगुणाः सत्त्वं यजुषाञ्च गुणो मुने ।
तमोगुणानि सामानि तमःसत्त्वमथर्व्वसु ॥
एतानि ज्वलमानानि तेजसाप्रतिमेन वै ।
पृथक् पृथगवस्थानं भान्ति पूर्व्वमिवाभवत् ॥
ततस्तदाद्यं यत्तेज ओमित्युक्ताभिशब्दते ।
तस्यानुभावाद्वक्त्रेभ्यस्तमास्थाय्त्व संस्थितम् ॥
यथा यजुर्म्मयं तेजो यच्च साम्नां महामुने ।
एकत्वमुपयातानि परतेजसि संश्रयात् ॥
शान्तिकं पौष्टिकञ्चैव तथा चैवाभिचारिकम् ।
ऋगादिषु लयं ब्रह्मंस्त्रितयं त्रिष्वथागमत् ॥
ततो विश्वमिदं सद्यस्तमोनाशात् सुनिर्म्मलम् ।
बभावतीव विप्रर्षे तिरश्चोर्द्धमधस्तथा ॥
ततस्तन्मण्डलीभूतं छान्दसं तेज उत्तमम् ।
परेण तेजसा ब्रह्मन् ! एकत्वमुपगम्य तत् ॥
आदित्यसंज्ञामगमदादावेव यतोऽभवत् ।
विश्वस्यास्य महाभाग कारणञ्चाव्ययात्मकम् ॥
प्रातर्मध्यन्दिने चैव तथा चैवापराह्णिके ।
त्रयी तपति सा काले ऋग्यजुःसामसंश्रिता ॥
ऋचस्तपन्ति पूर्व्वाह्णे मध्याह्ने च यजूंषि वै ।
सामानि चापराह्णे तु तपन्ति मुनिसत्तम ॥
शान्तिकं ऋक्षु पूर्व्वाह्णे यजुःस्वत्र च पौष्टिकम् ।
अपराह्णे स्थितं नित्यं सामस्वेवाभिचारिकम् ॥
सृष्टौ च ऋङ्मयो ब्रह्मा स्थितौ विष्णुर्यजुर्म्मयः ।
रुद्रः साममयोऽन्ते च तस्मात्तस्या शुचिर्ध्वनिः ॥
तदेवं भगवान् भास्वान् वेदात्मा वेदसंस्थितः ।
वेदविद्यात्मकश्चैव परः पुरुष उच्यते ॥
सर्गस्थित्यन्तहेतुः स रजःसत्त्वादिकैर्गुणैः ॥